‘मन की बात’ (५३-वीं कड़ी) प्रसारणतिथिः - २४-०२-२०१९

- संस्कृत-भाषान्तर-कर्ता - डॉ.बलदेवानन्द-सागरः

मम प्रियाः देशवासिनः, नमस्कारः । ‘मन की बात’-इति प्रसारणम् आरभमाणोऽहम् अद्य मनसि भावाकुलतामनुभवामि । दश-दिनेभ्यः प्राक्, भारत-माता स्वीयान् वीर-सुपुत्रान् वियुक्तान् अन्वभवत् । एते पराक्रमशीलाः वीराः, अस्माकं सपाद-शतकोटि-भारतीयानां रक्षायै हुतात्मनः सञ्जाताः । देशवासिनः सुखेन शयीरन्, अत एव, एते अस्मदीयाः वीर-सुपुत्राः, अहर्निशम् अनारतञ्च सेवन्ते । पुलवामा-क्षेत्रे आतङ्काक्रमणे, वीर-सैनिकानाम् आत्म-बलिदानानन्तरं अशेष-देशे जनेषु, जनमानसेषु च, आघातः आक्रोशश्च प्रवर्तेते । हुतात्मनः तेषाञ्च कुटुम्बानि प्रति, परितः सम्वेदनाः समुद्भवन्ति । अस्याः आतङ्कहिंसायाः विरोधार्थम्, यः आवेगो भवतां मदीये च मानसे वर्तते, सः एव भावः, प्रत्येकमपि देशवासिनाम् अन्तर्मनस्सु वर्तते तथा च, मानवतायां विश्वासकर्तुः विश्वस्य अपि मानवतावादिषु समुदायेषु अस्ति । भारत-मातुः रक्षायै, निज-प्राणार्पकान्, देशस्य सर्वान् वीर-सुपुत्रान्, नमामि । इदं बलिदानम्, आतङ्कं समूलं प्रणाशयितुम् अस्मान् निरन्तरं प्रेरयिष्यति, अस्मदीयं सङ्कल्पम् इतःपरमपि दृढतरं विधास्यति । देशस्य सम्मुखं समापतितस्य अस्य समाह्वानस्य प्रतीकारः, अस्माभिः सर्वैः जातिवादं, सम्प्रदायवादं, क्षेत्रवादं सर्वान् अपि मतभेदान् च विस्मृत्य करणीयः येन आतङ्कं विरुद्ध्य अस्मदीयः पदक्षेपः पूर्वकालापेक्षया अधिकं दृढतरः स्यात्, अधिकतरः शक्तः निर्णायकश्च भवेत् । अस्मदीयं सशस्त्र-बलं सर्वदैव अद्वितीय-साहसस्य पराक्रमस्य च प्रदर्शनं कुर्वदस्ति । शान्तेः स्थापनायै अमुना यत्र अद्भुता क्षमता प्रदर्शिता, तत्रैव च आक्रमण-कर्तॄन् अपि तेषामेव भाषया प्रत्युत्तरितुमाचरितम् । भवन्तो दृष्टवन्तः स्युः यत् आक्रमणस्य शत-होरावधावेव केन प्रकारेण समुपायाः अनुष्ठिताः । सेनाः आतङ्कवादिनः तेषाञ्च सहायकान् समूलं नाशयितुं सङ्कल्पं धृतवत्यः । वीर-सैनिकानां बलिदानानन्तरम्, सञ्चारमाध्यमानां माध्यमेन तेषां कुटुम्ब-जनानां यानि प्रेरणादायीनि तथ्यानि प्रकाशितानि, तानि अशेष-देशस्य साहसम् इतःपरमपि बलवत्तरं व्यदधात् । बिहारस्य भागलपुरस्य हुतात्मनः रतनठाकुरस्य पिता

रामनिरंजन-महोदयः, दुःखस्य अस्मिन् क्षणेऽपि यं दृढभावं प्रादर्शयत्, सः अस्मान् सर्वान् सततं प्रेरयति । तेनोक्तं यदसौ नैजम् अपरं पुत्रमपि शत्रून् प्रतीकर्तुं प्रेषयिष्यति, तथा चावश्यकतायां सत्यां स्वयमपि योद्धुं यास्यति ।ओड़िशा-राज्यस्य जगतसिंहपुरस्य हुतात्मनः प्रसन्नासाहू-वर्यस्य पत्न्याः मीना-महोदयायाः अदम्य-साहसम् अशेष-देशः अभिनन्दति ।सा स्वीयम् एकमात्रमपि पुत्रं CRPF- इति केन्द्रियारक्षितारक्षि-बले प्रवेशयितुं निरणैषीत् । यदा त्रिवार्णिक-ध्वजेन आवृतो हुतात्मनो विजय-शोरेन-वर्यस्य शवः झारखण्डस्य गुमला-स्थलम् आगच्छत्, तदा निर्दोषः तदात्मजः इदमेव अब्रवीत् यत् अहमपि सेनासु प्रवेक्ष्यामि । अस्य निर्दोष-बालस्य भावः साम्प्रतं भारतवर्षस्य प्रत्येकमपि बालस्य भावनाम् अभिव्यञ्जयति ।एतादृश्यः एव भावनाः, अस्माकं वीराणां, पराक्रमिणाञ्च हुतात्मनां प्रतिगृहम् अवालोक्यन्ते । अस्मदीयः अन्यतमोऽपि वीरो हुतात्मा अत्र अपवादरूपो नास्ति, तेषाञ्च कुटुम्बं अपवादत्वेन नैवास्ति । भवतु तत् देवरिया-क्षेत्रस्य हुतात्मनो विजय-मौर्यस्य कुटुम्बम्, आहोस्वित् भवतात् कांगड़ा-क्षेत्रस्य हुतात्मनः तिलकराजस्य पितरौ उताहो भवेत् कोटा-क्षेत्रस्य हुतात्मनः हेमराजस्य षड्वर्षीयः सुतः – हुतात्मनां प्रत्येकमपि कुटुम्बस्य कथा, प्रेरणा-सम्भरितास्ति । युवजनान् अहम् अनुरुन्धे यत्ते, एतैः कुटुम्बैः प्रदर्शितां भावनाम् अवगच्छेयुः, अनुभवितुञ्च प्रयतेरन् ।किन्नाम भवति देशभक्तिः, त्याग-तपस्याचरणञ्च किं भवति– एतदर्थम् इतिहासस्य प्राचीनाः घटनाः प्रति गमनस्यावश्यकता नैव भविता । अस्माकं समक्षमेव, एतानि जीवन्ति उदाहरणानि सन्ति तथा चैतान्येव उज्ज्वल-भारतस्य भविष्यत्कृते प्रेरणा-कारणानि सन्ति ।

मम प्रियाः देशवासिनः, स्वातन्त्र्यावाप्तेः एतावद्दीर्घ-कालपर्यन्तम्, वयं सर्वे, यं युद्ध-स्मारकं प्रतीक्षामहे स्म, सा प्रतीक्षा साम्प्रतं समाप्त-प्रायास्ति । एतद्विषयिणी देशवासिनां जिज्ञासा, उत्सुकता च स्वाभाविके स्तः । NarendraModiApp-इत्यत्र कर्नाटकस्य उडुपीतः, श्री-ओंकारशेट्टी राष्ट्रिय-युद्ध-स्मारकस्य सन्नद्धतामभिलक्ष्य स्वीयां प्रसन्नतां प्राकटयत् । अहम् आश्चर्यमपि अनुभवन्नासम्, तथा च, पीडामपि यत् भारते किमपि राष्ट्रिय-युद्ध-स्मारकं नास्तीति ।एकमेतादृशं स्मारकं, यत्र राष्ट्र-रक्षायै निज-प्राणार्पकाणां वीर-सैनिकानां शौर्य-गाथाः संरक्षिताः स्युः । अहं निर्णीतवान् यत् देशे, एकमेतादृशं स्मारकमवश्यं स्यात् ।

वयं राष्ट्रिय-युद्ध-स्मारकस्य निर्माणार्थं निर्णीतवन्तः, तथा चाहं प्रसीदामि यत् स्मारकमिदं एतावति अल्प-काले निर्मितं जातम् | श्वोऽर्थात्, मासेऽस्मिन् पञ्चविंशे दिने, वयं कोटिशो देशवासिनो राष्ट्रिय-युद्ध-स्मारकं, अस्मदीय-सेनाभ्यः अर्पयिष्यामः | देशः स्वीयमृणं प्रतिशोधयितुं लघु-प्रयासमेकं विधास्यति |

दिल्ल्याः हृदयम् अर्थात् तत्स्थानं, यत्र इण्डिया-गेट्-अमरजवानज्योतिश्चेति वर्तेते, एवम्, तत्पार्श्वे एव, इदं नूतनं स्मारकं विनिर्मितमस्ति | विश्वसिमि यत् देशवासिनां कृते राष्ट्रिय-युद्ध-स्मारकं प्रति गमनं हि तीर्थस्थल-गमन-सदृशं भविता | राष्ट्रिय-युद्ध-स्मारकमिदं स्वतन्त्रताप्राप्तेः अनन्तरं सर्वोच्च-बलिदान-कर्तॄणाम् अस्माकं सैनिकानां पुण्य-स्मृतौ राष्ट्रस्य कृतज्ञता-प्रतीकरूपमेवास्ति | स्मारकस्य प्रारूपम्, अस्मदीयानां अमरसैनिकानाम् अदम्यसाहसं प्रदर्शयति | राष्ट्रिय-युद्ध-स्मारकस्य सङ्कल्पना, चक्र-चतुष्टय-केन्द्रितास्ति, यत्र एकस्मिन् चक्रे सैनिकस्य जन्मतः आरभ्य सर्वोच्च-बलिदान-पर्यन्तं विहित-यात्रायाः चित्रणमस्ति | अमरचक्रस्य दीपशिखा, हुतात्म-सैनिकस्य अमरता-प्रतीकत्वेन वर्तते | द्वितीयं हि वीरताचक्रमस्ति यद्धि सैनिकानां साहसं पराक्रमं च प्रदर्शयति | एषा एका तादृशी कला-वीथिकास्ति यत्र भित्तिषु सैनिकानां शौर्यपूर्ण-कार्याणि उत्कीर्णानि सन्ति | ततः परं, त्यागचक्रं वर्तते, चक्रमिदं सैनिकानां बलिदानं प्रदर्शयति | अस्मिन् देशस्य कृते सर्वोच्च-बलिदान-कर्तॄणाम् अस्माकं सैनिकानां नामानि स्वर्णाक्षरैः लिखितानि सन्ति | ततः परं रक्षकचक्रम्, सुरक्षां प्रदर्शयति | अस्मिन् चक्रे सघन-वृक्ष-पङ्क्तिः अस्ति | एते वृक्षाः सैनिकप्रतीक-रूपाः सन्ति, तथा च देशस्य नागरिकान् विश्वासयन्तः सन्देशममुं प्रददति यत् प्रतिपलं सैनिकाः सीम्नि नियुक्ताः सन्ति, तथा च देशवासिनः सुरक्षिताः सन्ति | आहत्य परिशीलयेम चेत् तदा राष्ट्रिय-युद्ध-स्मारकस्य अभिज्ञानं तादृश-स्थानरूपेण भविता यत्र जनाः देशस्य महतां हुतात्मनां विषयेऽवगन्तुं, स्वीय-कृतज्ञतां प्रकटयितुं, तान् चानुसन्दधातुम् आगमिष्यन्ति | अत्र तेषां बलिदानिनां कथाः वर्तन्ते ये हि देशरक्षार्थं निज-प्राणान् समर्पितवन्तः येन वयं जीवितुं शक्नुयाम, येन च देशः सुरक्षितो

भवेत् विकसितुञ्च पारयेत् | देशस्य विकासार्थम् अस्माकं सशस्त्रबलानाम्, रक्षिणाम् अर्द्धसैनिक-बलानाञ्च महद्-योगदानं हि शब्दैः अभिव्यञ्जयितुं नैव शक्यते | विगते वर्षे ओक्टोबरमासे राष्ट्रियारक्षि-स्मारकमपि देशाय समर्पयितुमहं सौभाग्यमलभे | तदपि अस्माकं तस्य विचारस्य प्रतिबिम्बमासीत् यदन्तर्गतं वयं मन्यामहे यत् देशः तान् पुरुषान् महिलाः आरक्षि-कर्मिणश्च प्रति कृतज्ञः स्यात् ये ह्यनारतम् अस्माकं सुरक्षायां संलग्नाः सन्ति | आशासे यत् भवन्तः राष्ट्रिय-सैनिक-स्मारकं राष्ट्रियारक्षि-स्मारकञ्चावलोकयितुं नूनं यास्यन्ति | भवन्तो यदापि तत्र गच्छेयुः, तत्रादत्तानि स्वीय-चित्राणि सामाजिक-सञ्चार-माध्यमेषु अवश्यं सम्विभाजयेयुः येन अपरेऽपि जनाः प्रेरिताः भवेयुः, तथा च, तेऽपि पवित्रस्थलमेतत्, स्मारकमिदम् अवलोकयितुं समुत्सुकाः स्युः|

मम प्रियाः देशवासिनः, 'मन की बात' - इति कार्यक्रमस्य कृते भवतां सहस्रशः पत्राणि टिप्पणीश्चाहम्, पृथक्-पृथक्-माध्यमेभ्यः पठनार्थं लभे | अस्मिन् क्रमे यदाहं भवतां टिप्पणीः पठन्नासम्, तदा 'आतिश-मुखोपाध्याय-महोदयस्य' एका रुचिकरा टिप्पणी ममावधाने आगता | तेन लिखितं यत् ऊनविंश-शततमे वर्षे मार्चमासे तृतीये दिने, आङ्ग्लाः बिरसा-मुंडा इत्येनं निगृहीतवन्तः तदा अस्यायुः केवलं पञ्चविंश-वर्षमितमासीत् | अयन्तु संयोगः यत् मार्च-मासीये तृतीये दिने एव जमशेदजी-टाटा-महोदयस्यापि जयन्ती वर्तते | तथा चासौ अग्रे लिखति - एतद्-व्यक्तित्व-द्वयमपि पूर्णतया पृथक्-पृथक्-पारिवारिक-पृष्ठभूमि-द्वयात् वर्तते, याभ्यां झारखण्डस्य रिक्थम् इतिहासश्च समृद्धि-सम्भरितौ विहितौ | 'मन की बात'- इत्यत्र 'बिरसा मुंडा'-'जमशेदजी-टाटा'-महोदयाभ्यां श्रद्धाञ्जलि-प्रदानावसरः, प्रकारान्तरेण झारखण्डस्य गौरवशालिनम् इतिहासं रिक्थञ्च प्रति प्रणति-सदृशं वर्तते | आतिश-महोदय ! अहं भवता सहमतोऽस्मि | अमुना महता विभूति-द्वयेन न केवलं झारखण्डस्य, अपितु अशेषदेशस्य कीर्तिः वर्धापिता | सम्पूर्णोऽपि देशः अनयोः योगदानस्य कृते कृतज्ञोऽस्ति | अद्य, यदि अस्माकं नवयुवकानां मार्गदर्शनार्थं कस्यचन प्रेरणादायिनो व्यक्तित्वस्य

आवश्यकतास्ति चेत्, सोऽस्ति भगवान् ‘बिरसामुंडा’ | आङ्ग्लाः निलीय, अतिचातुर्येण तं तदा निगृहीतवन्तः यदासौ शयानः आसीत् | किं भवन्तो जानन्ति यत् ते कथमेतादृशं क्लैब्य-पूर्णं कार्यमाश्रितवन्तः? यतो हि एतावतो महतः साम्राज्यस्य प्रतिष्ठापकाः आङ्ग्लाः अपि तस्मात् भीताः तिष्ठन्ति स्म |भगवान् ‘बिरसामुंडा’ केवलं स्वीयैः पारम्परिकैः धनुष्बाणैः एव भुशुण्डी-शतघ्नी-युतम् आङ्ग्लशासनं दोलायितमकरोत् | वस्तुतस्तु, यदा जनाः प्रेरणादायि-नेतृत्वं लभन्ते तदा आयुधानां शक्तेरपेक्षया जनानां सामूहिकी इच्छाशक्तिः बलवत्तरा भवति |भगवान् ‘बिरसामुंडा’ आङ्ग्लैः साकं न केवलं राजनीतिक-स्वाधीनतायै सङ्घर्षमकरोत् परञ्च आदिवासिनां आर्थिक-सामाजिकाधिकाराणां कृतेऽपि युद्धमकरोत् | स्वीये अल्पे एव जीवनेऽसौ सर्वमप्येतत् अनुष्ठितवान् | वञ्चितानां शोषितानाञ्च तमोमये जीवनेऽसौ सूर्य-सदृशं प्रकाशं विस्तारितवान् |भगवान् बिरसा-मुंडा पञ्चविंशवर्षीये एव अल्प-वयसि स्वीयं बलिदानमकरोत् |बिरसा-मुंडा-सदृशाः भारत-मातुः सुताः, देशस्य सर्वेष्वपि कोणेषु अभूवन् | कदाचित् हिन्दुस्थानस्य कश्चन तादृशः कोणो भविष्यति, यत्र शताब्देभ्यः प्रचलितेऽस्मिन् स्वाधीनता-युद्धे, केनचिद् योगदानं न प्रदत्तं भवेत् | परञ्चेदं दुर्भाग्यं यत् एतेषां त्याग-शौर्य-बलिदान-कथाः नूतन-सन्ततये नैव प्रापिताः |यदि, भगवद्-‘बिरसा-मुंडा’-सदृन्शि व्यक्तित्वानि अस्मान् निजास्तित्व-बोधमकारयन् चेत्तदा जमशेदजी-टाटा-सदृन्शि व्यक्तित्वानि देशाय बृहन्ति संस्थानानि प्रादुः |जमशेदजी-टाटा, परमार्थतो दूरदृष्टासीत्, यो हि न केवलं भारतस्य भविष्यत् अवालोकयत् परञ्च एतस्य सुदृढाम् आधारशिलामपि प्रतिष्ठापितवान् | असौ सम्यक्तया अवगच्छति स्म यत् विज्ञान-प्रविध्युद्योगानां चक्रनाभित्वेन भारतस्य निर्माणं हि भावि-कालार्थं परमावश्यकम् | इदं तस्यैव निदर्शनमासीत् यस्य परिणामरूपेण टाटा-विज्ञान-संस्थानं स्थापितं यद्धि साम्प्रतं भारतीय-विज्ञान-संस्थानमिति कथ्यते | एतावदेव नैव, असौ Tata Steel -इति टाटा-लौहसार-सदृशानाम् अनेकेषां विश्वस्तरीय-संस्थानानाम् उद्योगानामपि प्रतिष्ठापनम् अकरोत् | ‘जमशेदजी-टाटा’-‘स्वामिविवेकानंदजी’-इत्यनयोः

समागमः अमेरिकीययात्रावधौ जलपोते अभवत्, तदा तयोः चर्चायाः महत्वपूर्ण-बिन्दुः भारते विज्ञान-प्रविध्योः प्रचार-प्रसारेण संयुतः आसीत् |कथ्यते... अनया एव चर्चया भारतीय-विज्ञान-संस्थानस्य आधारशिला न्यस्ता |

मम प्रियाः देशवासिनः, अस्माकं देशस्य पूर्व-प्रधानमन्त्रिणः मोरारजी-भाई-देसाई-महोदयस्य जन्म फेब्रुआरि-मासे ऊनत्रिंशत्तमे दिने अभवत् | यथा भवन्तः सर्वेऽवगच्छन्ति यद्दिनमिदं चतुर्षु वर्षेषु एकवारमेवायाति |सहजस्य, शान्तिपूर्ण-व्यक्तित्वस्य च स्वामी, श्रीमोरारजी-भाईः देशस्य अनुशासिततमेषु नेतृषु अन्यतमः आसीत् |स्वतन्त्र-भारते संसदि सर्वाधिकानां महाय-व्यय-पत्रकाणाम् उपस्थापनस्य कीर्तिमानं मोरारजीभाई-देसाईमहोदयस्य नाम्नि एव वर्तते | श्री-मोरारजीदेसाईः तस्मिन् कठिने काले भारतस्य कुशलनेतृत्वमकरोत्, यदा देशस्य लोकतान्त्रिक-स्वरूपं सङ्कटापन्नमासीत् | एतदर्थं अस्मदीयाः भावि-सन्ततयोऽपि तस्य कार्तज्ञ्यमावक्ष्यन्ति | श्रीमोरारजी-भाई-देसाईः लोकतन्त्रस्य रक्षायै आपातकालं विरुद्ध्य प्रवर्तिते आन्दोलने आत्मानम् न्यस्तवान् | एतदर्थमसौ वृद्धावस्थायामपि बहुमूल्यं प्रादात् | तस्मिन् समये सर्वकारः तं निगृह्य कारायां न्यक्षिपत् | ऊनविंश-शताब्दस्य सप्त-सप्ततितमे वर्षे यदा जनतापार्टीति दलं निर्वाचनानि विजितवत्, तदासौ देशस्य प्रधानमन्त्रित्वमवाप्नोत् | तस्य कार्यकालावसरे एव चतुश्चत्वारिंशत्तमं सम्विधान-संशोधन-विधेयकमुपस्थापितम् | एतत् सुतरां महत्वाधायि यतो हि आपातकालावसरे यत् द्विचत्वारिंशत्तमं संशोधनमुपस्थापितम्, यस्मिन् सर्वोच्च-न्यायालयस्य शक्ति-व्यवकलनम्, अपराणि चैतादृन्शि प्रावधानान्यासन्, यानि अस्मदीय-लोकतान्त्रिक-मूल्य-घातकान्यासन् - तानि परावर्त्तितानि | यथा चतुश्चत्वारिंशत्तमस्य संशोधनस्य माध्यमेन संसदः विधानसभानाञ्च कार्यानुष्ठानस्य वार्त्तापत्रेषु प्रकाशन-प्रावधानं विहितम् | एतदन्तर्गतमेव, सर्वोच्च-न्यायालयस्य केचन अधिकाराः पुनः प्रवर्तिताः | अस्मिन्नेव संशोधने इदमपि प्रावधत्तं यत् संविधानस्य विंशत्येकविंशत्योः अनुच्छेदयोः अन्तर्गतं अधिगतानां मौलिकाधिकाराणाम् आपातकालेऽपि हननं कर्तुं नैव शक्यते | प्रथमवारमेव

एतादृशं व्यवस्थापितं यन्मन्त्रिमण्डलस्य लिखितानुशंसाधारेण एव राष्ट्रपतिः आपातकालमुद्घोषयिष्यति, युगपदेव इदमपि सुनिश्चितं यत् आपातकालः एकस्मिन् क्रमे षण्मासेभ्योऽधिकावधये वर्धयितुं नैव शक्ष्यते । एवं हि श्रीमोरारजी-भाईः इदं सुनिश्चितं कृतवान् यत् आपातकालं प्रवर्त्य, ऊनविंश-शताब्देः पञ्चसप्ततितमे वर्षे येन प्रकारेण लोकतन्त्रम् आहतीकृतमासीत्, तत् भविष्यति काले पुनः आवर्तयितुं नैव शक्येत ।भारतीय-लोकतन्त्रस्य माहात्म्यं सन्धारयितुं तस्य अमूल्य-योगदानम्, भावि-सन्ततयः सर्वदैव स्मरिष्यन्ति । पुनरेकवारम् एतादृशे महते नेत्रेऽहं स्वीयं श्रद्धाञ्जलिमर्पयामि ।

मम प्रियाः देशवासिनः, प्रतिवर्षमिव ऐषमः अपि पद्म-पुरस्कार-विषये जनेषु महती समुत्सुकतासीत् । साम्प्रतं वयं नूतन-भारतं प्रत्यग्रेसरामः । अत्र वयं तान् जनान् सम्मानयितुमभिलषामः ये हि मूलाधार-स्तरे निजकार्याणि निष्काम-भावेन समाचरन्ति ।निज-परिश्रमाधारेण पृथक्-पृथक्-पद्धत्या अपरेषां जीवने सकारात्मकं परिवर्तनमापादयन्ति । वस्तुतस्तु, एते परमार्थतया कर्मयोगिनो वर्तन्ते, ये हि जनसेवायाम्, समाजसेवायाम्, तथा च, सर्वोपरि राष्ट्रसेवायां निःस्वार्थभावेन संलग्नाः सन्ति ।भवन्तो दृष्टवन्तो भवेयुः यद्- यदा पद्म-पुरस्काराः उद्घोष्यन्ते तदा जनाः पृच्छन्ति यदयं कः इति? एकतस्तु एषास्ति महती सफलता इति मन्ये यतो हि एते, ते जनाः सन्ति ये हि पत्रिका-दैनिक-वार्त्तापत्र-दृश्यवाहिनीनां प्रमुखवार्तासु प्रथम-पृष्ठे च नैव चर्च्यन्ते । एते चाकचिक्यस्य संसारात् दूरे एव वर्तन्ते, परञ्च एते तादृशाः जनाः सन्ति, ये हि स्वीय-नाम्नः प्रचारं नैव समीहन्ते । केवलम्, आधारस्तरीये कार्यानुष्ठाने विश्वसन्ति ।'योगः कर्मसु कौशलम्' - इति गीता-सन्देशं ते साक्षात् जीवन्ति । अहम् एतादृशानां केषाञ्चन जनानामेव विषये भवतः सूचयितुं वाञ्छामि ।ओडिशा-राज्यस्य दैतारी-नायकस्य विषये भवन्तोऽवश्यं श्रुतवन्तः स्युः, सः 'Canal Man of the Odisha'- इति ओडिशा-कुल्या-पुरुषः इति निरर्थकं नैव निगद्यते, दैतारी-नायकः निज-ग्रामे स्वीय-हस्ताभ्यामेव पर्वत-कर्तनं कृत्वा किलोमीटर-त्रय-मितायाः जल-कुल्यायाः मार्गं

विनिर्मितवान् । स्वीय-परिश्रमेण सेचन-पेयजल-समस्यां सर्वकालार्थं समाहितवान् । गुजरातस्य अब्दुल-गफूर-खत्री-महोदयमेव अभिजानन्तु, असौ कच्छ-क्षेत्रस्य पारम्परिक्याः रोगन-चित्रकलायाः पुनर्जीवनं विधाय अद्भुतकार्यमकरोत् । असौ एनां दुर्लभ-चित्रकलां नूतन-सन्ततिं यावत् प्रापणस्य बृहत्कार्यं विदधाति ।अब्दुल-गफूर-द्वारा चित्रितां 'Tree of Life'-इति कलाकृतिमेवाहं अमेरिका-पूर्व-राष्ट्रपतये बराक-ओबामा-महोदयाय उपहार-रूपेण प्रादाम्। पद्मपुरस्कार-प्रापकेषु मराठवाड़ा-क्षेत्रस्य शब्बीर-सैय्यदः गौ-मातुः सेवक-रूपेण प्रख्यातोऽस्ति । सः येन प्रकारेण नैजं पूर्णमपि जीवनं गौमातुः सेवायामर्पितवान् - तदस्ति अनुपमम् उदाहरणम् ।मदुरै-चिन्ना-पिल्लईः तद् व्यक्तित्वमस्ति, यो हि सर्वप्रथमं तमिलनाडु-राज्ये कलन्जियम्-आन्दोलन-माध्यमेन पीडितानां शोषितानाञ्च क्षमीकरणार्थं प्रायतत । युगपदेव, समुदायाधृतायाः लघु-वित्तीय-व्यवस्थायाः शुभारम्भमकरोत् ।अमेरिका-देशस्य Tao Porchon-Lynch-विषये श्रुत्वा भवन्तः सुखदाश्चर्य-पुलकिताः भविष्यन्ति ।Lynch-महाभागा साम्प्रतं योगाचरणस्य जीवन्ती संस्था सञ्जातास्ति । शत-वर्षीया सत्यपि सा अशेष-जगतो जनान् योगं प्रशिक्षयति, तथा च, साम्प्रतं यावत् सार्ध-सहस्रं जनान् योग-शिक्षकान् व्यदधात् ।झारखण्ड-राज्ये 'Lady Tarzan'-इति नाम्ना विख्याता जमुना-टुडू काष्ठापराधिनो नक्सलवादिनश्च सम्मुखीकर्तुं साहसिक-कार्यमकरोत् । सा न केवलं पञ्चाशद्-हेक्टेयर्-मितं काननं शुष्कीभवनात् संरक्षितवती, परञ्च दश-सहस्रं महिलाः समवेतीकृत्य वृक्षाणां वन्यजीवानाञ्च सुरक्षायै ताः प्रेरितवती । अयं हि जमुना-महोदयायाः परिश्रमस्य परिणामः एव यत् साम्प्रतं ग्रामीणाः प्रत्येकमपि शिशोः जन्मावसरे अष्टादश-वृक्षान्, तथा च, कन्यायाः विवाहावसरे दश-वृक्षान् आरोपयन्ति । गुजरातस्य मुक्ताबेन-पंकजकुमार-दगली-महोदयायाः कथा भवतः प्रेरणाभरितान् विधास्यति, स्वयं दिव्याङ्गा सत्यपि सा दिव्याङ्ग-महिलानां समुन्नयनाय कार्याणि अकरोत्, एतादृशमुदाहरणं सुतरां दुर्लभं वर्तते ।चक्षु-महिला-सेवाकुञ्ज-नाम्न्याः संस्थायाः स्थापनां कृत्वा सा नेत्रहीनान् बालान् आत्मनिर्भरान् विधातुं तद्विषयके

पुनीतकार्ये संलग्नास्ति | बिहारस्य मुजफ्फरपुरस्य किसान-चाची, अर्थात् राजकुमारी-देवी - तस्याः कथा अतितरां प्रेरिकास्ति | महिला-शक्तिकरणं कृषिञ्च लाभप्रदां विधातुं तद्दिशायां सा उदाहरणमेकं स्थापितवती | किसान-चाची-महाभागा स्वीय-क्षेत्रस्य त्रिशतं महिलाः 'Self Help Group'- इत्यनेन संयोज्य आर्थिकरूपेण स्वावलम्बन-दिशि ताः प्रेरितवती | सा कृषि-कर्मणा साकमेव वृत्तितायाः अन्यसाधनविषये ग्रामीण-महिलाः प्रशिक्षितवती | अत्र वैशिष्ट्यमिदमेव यत् सा कृषिकर्मणा सार्धं प्रविधेः संयोजनस्य कार्यमकरोत्, अपि च, मम देशवासिनः! कदाचित् प्रथमवारमिदं सम्वृत्तं यत् ऐषमः ये पद्म-पुरस्काराः प्रदत्ताः तेषु द्वादश कृषकाः पद्म-पुरस्कारान् अवाप्नुवन् | सामान्यतया कृषि-जगत्-सम्बद्धाः अत्यल्पाः जनाः, तथा च, प्रत्यक्षं कृषिकर्म-निरताः बहुशो न्यूनाः जनाः पद्मश्री-पुरस्कार-सूचौ समाविष्टाः सन्ति | एतत्तु स्वयमेव, परिवर्तमानस्य हिन्दुस्थानस्य जीवच्चित्रं वर्तते|

मम प्रियाः देशवासिनः, अद्याहं भवद्भिः सर्वैः साकं हृदयस्पर्शिनं मार्मिकञ्चैकम् अनुभवं सम्विभाजयितुं वाञ्छामि यमहं विगतेभ्यः कतिचिद्दिवसेभ्यः सावेगमनुभवामि | अद्यत्वे देशे यत्रापि यामि, मम प्रयासो भवति यत् 'आयुष्मान् भारत'- इति PM-JAY- अर्थात् प्रधानमन्त्रि-जनारोग्य-योजनायाः लाभार्थिनो मिलेयम् | कैश्चित् जनैः साकं सम्भाषणावसरो लब्धः | एकाकिनी जननी, तस्याश्च लघु-बालकाः - सा धनाभावात् उपचारादिकं कर्तुं नैवापारयत् | अस्याः योजनायाः कारणात् ते उपचारिताः, सा च स्वस्थाभवत् | गृहस्य अग्रणी, परिश्रमं कृत्वा निज-कुटुम्बस्य निर्वाहकः सन् दुर्घटना-पीडितः सञ्जातः, कार्यं कर्तुं नैव पारयति स्म - अनया योजनया सः लाभान्वितो जातः तथा चासौ पुनः स्वस्थः सम्वृत्तः, नूतनजीवनं जीवितुम् |

भगिन्यो भ्रातरश्च, विगतेषु पञ्च-मासेषु प्रायेण निर्धन-कुटुम्बानां द्वादश-लक्षम् अनया योजनया लाभान्वितं सम्वृत्तम् | अहमन्वभवं यत् निर्धनस्य जीवनमनया योजनया कियत् बृहत्-परिवर्तनमनुभवति | भवन्तः सर्वेऽपि यदि कञ्चित्

तादृशं निर्धनं जनं जानन्ति, यो हि धनाभावात् उपचारं कर्तुं नैव पारयति चेत्, तदा तमस्याः योजनायाः विषये नूनम् अवबोधयन्तु | योजनैषा प्रत्येकमपि निर्धन-जनायैव वर्तते |

मम प्रियाः देशवासिनः, विद्यालयेषु परीक्षा-कालः आसन्नप्रायः एव | सम्पूर्णस्यापि देशस्य पृथक्-पृथक्-शिक्षामण्डलानि आगामिषु कतिपय-सप्ताहेषु दशम्याः द्वादश्याः च कक्षयोः परीक्षायै प्रक्रियामारप्स्यन्ते | परीक्षा-प्रदायकेभ्यः सर्वेभ्यः विद्यार्थिभ्यः, तेषामभिभावकेभ्यः, सर्वेभ्यः शिक्षकेभ्यश्च मम हार्दिक्यः शुभकामनाः|

कतिपयेभ्यः दिनेभ्यः प्राक् दिल्ल्यां 'परीक्षा पे चर्चा'-इति बृहदायोजनं Town Hall-पद्धत्या सम्पन्नम् | कार्यक्रमेऽस्मिन् प्रविधि-माध्यमेनाहम्, देश-विदेशानां कोटिशः छात्रैः साकं, तेषामभिभावकैः सह, शिक्षकैश्च सार्धं, सम्भाषणस्य अवसरमवाप्नवम् | 'परीक्षा पे चर्चा' - इत्यस्य विशेषतेयमासीत् यत् परीक्षा-सम्बद्धान् विभिन्न-विषयान् आधृत्य मुक्तमनसा सम्भाषणमजायत | केचन तादृशाः पक्षाः समुपस्थिताः ये हि निश्चितरूपेण विद्यार्थिनां कृते लाभदायिनो भवितुमर्हन्ति | सर्वेऽपि विद्यार्थिनः, तेषां शिक्षकाः, पितरौ च YouTube-इत्यत्र कार्यक्रमस्य ध्वनि-चित्राङ्कनं पूर्णतयावलोकयितुमर्हन्ति, तर्हि सम्भावितानां परीक्षाणां कृते सर्वेभ्यः परीक्षा-योद्धृभ्यः मम भूयस्यो मङ्गल-कामनाः |

मम प्रियाः देशवासिनः, यत्र भारतं चर्च्यते तत्र उत्सवाः नैव चर्च्यन्ते इति तु नैव सम्भाव्यते | कदाचिदेव अस्माकं देशे किमपि दिनमेतादृक् नैवास्ति, यस्य महत्त्वं न स्यात्, यस्य कश्चन उत्सवो नैव भवेत् | यतो हि सहस्रशो वर्ष-प्राचीनायाः संस्कृतेः रिक्थमिदं अस्माकं पार्श्वे वर्तते | केषाञ्चन दिनानाम् अनन्तरं महाशिवरात्रि-पर्व आगमिष्यति, तथा च, ऐषमः शिवरात्रिपर्व सोमवासरेऽस्ति, यदा शिवरात्रिः सोमवासरे भवेत्तदा तस्य विशिष्टं महत्वम् अस्माकं मनो-मन्दिरे सुविराजते | एतन्महाशिवरात्रि-पावनपर्वावसरे भवद्भ्यः सर्वेभ्यः मम कोटिशो मङ्गल-कामनाः विलसन्तुतराम् |

मम प्रियाः देशवासिनः, कतिपय-दिनेभ्यः प्रागहं काशीमगच्छम् | तत्राहं दिव्याङ्ग-भगिनी-भ्रातृभिः साकं काल-यापनावसरम् अलभे | तैः साकं अनेक-विषयान् आलक्ष्य चर्चा जाता, तथा च, तेषाम् आत्मविश्वासः यथार्थतः प्रभावकः प्रेरकश्चासीत् | चर्चावसरे तेषु अन्यतमेन प्रज्ञाचक्षुषा नवयुवकेन साकं सम्भाषमाणः आसम् तदा सः अवोचत् यदहन्तु रङ्गकर्मी कलाकारोऽस्मि | मनोरञ्जन-कार्यक्रमेष्वहं मनोरञ्जनात्मकम् अनुकरणं करोमि, तदा मया एवमेव पृष्टं यत् भवान् कस्यानुकरणं करोतीति ? तदा तेनोक्तं यत् अहं प्रधानमन्त्रिणम् अनुकरोमि | तर्हि अहं किञ्चित् प्रदर्शयितुं तमुक्तवान्, तथा च, मम कृते सुतरामतितराञ्च सुखदमाश्चर्यमासीत्, तदा सः 'मन की बात'-प्रसारणे यथाहं सम्भाषे, तदेव तेनानुकृतम्, सः 'मन की बात'-कार्यक्रमम् अन्वकरोत् | एतत् श्रुत्वा नितरां प्रसन्नतामनुभूतवान् यत् जनाः न केवलं 'मन की बात'-कार्यक्रमं शृण्वन्ति, परञ्च, अनेकेषु अवसरेषु एनं स्मरन्त्यपि | सत्यमेवाहं तस्य दिव्याङ्ग-नवयुवकस्य शक्त्या अतितरां प्रभावितः|

मम प्रियाः देशवासिनः, 'मन की बात'-कार्यक्रमस्य माध्यमेन भवद्भिः साकं सञ्जायमानं संयोजनं मम कृते अनुपमानुभवरूपमासीत् | रेडियो-माध्यमेनाहं प्रतिमासम् एकतः कोटि-कोटि-कुटुम्बैः सम्भाषे | नैकवारन्तु भवद्भिः सर्वैः सम्भाषमाणः, भवतां पत्राणि पठन् आहोस्वित् भवद्भिः दूरभाषेण प्रेषितान् विचारान् शृण्वन् चाहमनुभवामि यत् भवन्तो मां निज-कुटुम्बस्यैव अङ्गत्वेन स्वीकृतवन्तः | एषास्ति मम कृते भूयसी सुखदानुभूतिः |

मित्राणि, निर्वाचनानि नाम लोकतन्त्रस्य सर्वोत्तमः उत्सवः |आगामि-मास-द्वये, वयं सर्वे निर्वाचनानां कार्य-बहुले प्रपञ्चे व्यापृताः भविष्यामः | स्वयमहमपि, एतेषु निर्वाचनेषु प्रत्याशी भवितास्मि | स्वस्थां लोकतान्त्रिक-परम्परां सम्मानयन् भावि 'मन की बात' इति मे-मासे अन्तिमे रविवासरे प्रसारयिष्यामि | अर्थात् मार्च-मासः, एप्रिल्-मासः पूर्णश्च मे-मासः चेति मास-त्रयस्य सर्वाः अस्मदीयाः भावनाः सन्ति, ताः सर्वाः निर्वाचनानाम् अनन्तरं नवीनेन विश्वासेन साकं भवताम्

आशीर्वाद-सामर्थ्येन सह, पुनरेकवारं 'मन की बात'-माध्यमेन अस्मदीय-सम्भाषणस्य शृङ्खलाम् आरभिष्ये, तथा च, अनेक-वर्षाणि यावत् भवद्भिः साकं 'मन की बात'-प्रसारणं सम्विभाजयिष्यामि | पुनरेकवारं भवद्भ्यः सर्वेभ्यः हृदयेन भूयो भूयः धन्यवादान् व्याहरामि | ....

*****

--- भाषान्तर-कर्ता - डॉ.बलदेवानन्द-सागरः

दूरभाषः - ९८१० ५६२२ ७७

अणुप्रेषः - baldevanand.sagar@gmail.com